स्नुक्रमोरनात्मनेपदनिमित्ते । (३६/२३२३)

नियमार्थमिदम् । [1]स्नुक्रमोः आर्धधातुकस्य वलादेः इडागमो भवति, न चेत् [2]स्नुक्रमौ [3]आत्मनेपदस्य [4]निमित्तं भवतः । क्व च तावात्मनेपदस्य [5]निमित्तम् ? [6]यत्रात्मनेपदं तदाश्रयं भवति, भावकर्म[7]कर्मकर्तृकर्मव्यतिहाराः क्रमेर्वृत्त्यादयश्च । तेनायं सत्यात्मनेपदे प्रतिषेधो भवति न असति इति । प्रतिषेधफलं चेदं सूत्रम् । स्नुक्रमो[8]रुदित्वात् इट् सिद्ध एव । प्रस्नविता । प्रस्नवितुम् । प्रस्नवितव्यम् । प्रक्रमिता । प्रक्रमितुम् । प्रक्रमितव्यम् । [9]अनात्मनेपदनिमित्ते इति किम् ? प्रस्नोषीष्ट । प्रक्रंसीष्ट । प्रस्नोष्यते । प्रक्रंस्यते । प्रसुस्नूषिष्यते । प्रचिक्रंसिष्यते । सर्वत्रैवात्र स्नौतिः क्रमिश्च आत्मनेपदस्य निमित्तम् । सनन्तादपि 'पूर्ववत्सनः' (१.३.६२/१७६४) इति आत्मनेपदं विधीयते । निमित्तग्रहणं किम् ? सीयुडादे[10]स्तत्परपरस्य च प्रतिषेधार्थम् । इह [11]तु प्रस्नवितेवाचरति इति प्रस्नवित्रीयते इति क्यङन्तमात्मनेपदस्य निमित्तम्, [12]न स्नौतिः ।

[८३५] क्रमेस्तु कर्तर्यात्मनेपदविषयादसत्या[13]त्मनेपदे कृति प्रतिषेधो वक्तव्यः । (म.भा. ३.२९२)

प्रक्रन्ता । उपक्रन्ता । कर्तरि इति किम् ? प्रक्रमितव्यम् । उपक्रमितव्यम् । आत्मनेपदविषयात् इति किम् ? निष्क्रमिता । स्नौतेः सनि किति च प्रत्यये[14] 'श्र्युकः किति' (७.२.११/२३८१), 'सनि ग्रहगुहोश्च' (७.२.१२/२६१०) [15]इत्येव प्रतिषेधो भवति । प्रसुस्नूषति । प्रस्नुतः । प्रस्नुतवान् ॥

ग्रहोऽलिटि दीर्घः । (३७/२८६२)

ग्रहः उत्तरस्य इटः अलिटि [16]दीर्घो भवति । ग्रहीता । ग्रहीतुम् । ग्रहीतव्यम् । अलिटि इति किम् ? जगृहिव । जगृहिम । प्रकृतस्येटो दीर्घत्वमिदम्[17], चिण्वदिटो न भवति । ग्राहिता । ग्राहिष्यते ॥

वृतो वा । (३८/२३०१)

[18]वृ इति वृङ्वृञोः सामान्येन ग्रहणम् । तस्मादुत्तरस्य ॠकारान्तेभ्यश्च इटो वा दीर्घो भवति । वरिता, वरीता[19] । प्रावरिता, प्रावरीता । ॠकारान्तेभ्यः – तरिता, तरीता[20] । आस्तरिता, आस्तरीता[21] । वृतः इति किम् ? करिष्यति । हरिष्यति । [22]अलिटि इत्येव, ववरिथ । तेरिथ ॥

---

1. स्नु क्रम इत्येतयोः क. इ. 2. स्नुक्रमी ई. 3. कृत्यात्मनेपदस्य निमित्ते ई. 4. निमित्ते क. 5. निमित्ते क. ई. 6. यत्रैव क. 7. कर्म नास्ति क. इ. 8. उदात्तत्वात् ई. इ, स्नुक्रमोरुदात्तत्वात् इट् ड. 9. आत्मनेपदनिमित्ते इति किम् ? क. 10. तपरकृत्परस्य क. 11. तु नास्ति क. 12. न स्नौतिः नास्ति ह. 13. आत्मनेपदकृति क. 14. परतः इत्यधिकम् ई. इ. 15. इति क.ई. 16. प्रत्यये परतः इत्यधिकम् क. 17. तेन इत्यधिकम् क. 18. दीर्घ इति वर्तते इत्यधिकम् क. 19. वरितुम् वरीतुम् विवरितव्यम् विवरीतव्यम् प्रावरितुम् प्रावरीतुम् प्रावरितव्यम् प्रावरीतव्यम् इत्यधिकम् क. 20. तरितुम् तरीतुम् तरितव्यम् तरीतव्यम् इत्यधिकम् क. 21. आस्तरितुम् आस्तरीतुम् आस्तरितव्यम् आस्तरीतव्यम् इत्यधिकम् क. 22. वाक्यमिदं नास्ति क.इ.ई.ह.